चि, क मि चित्याम्। इति कविकल्पद्रुमः॥ (चुरां-परं-द्विकं-सेट्।) क मि, चययति चाययति। खमते तु चपयति चापयतीत्यपि। इति दुर्गादासः॥

चिकित्सकः, पुं, (चिकित्सति रोगमपनयतीति। कित्+"गुप्तिज्किद्भ्यः सन्।"३।१।५। इति स्वार्थे सन्+ण्वुल्।) चिकित्साकर्त्ता। (यथा, मनुः। ६।२८४।
"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः॥")
तत्पर्य्यायः। रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५। इत्यमरः। २। ६। ५७॥ तस्य लक्षणं यथा, चाणक्ये।
"आयुर्व्वेदकृताभ्यासः सर्व्वेषां प्रियदर्शनः।
आर्य्यशीलगुणोपेत एष वैद्यो विधीयते॥"

चिकित्सा, स्त्री, (चिकित्सनमिति। कित् व्याधिप्रतीकारे+"गुप्तिज्किद्भ्यः सन्।"३।१।५। इति स्वार्थे सन् ततः अप्रत्ययः।) रोगप्रतीकारः। तत्पर्य्यायः। रुक्प्रतिक्रिया २। इत्यमरः। २। ६। ५०॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ वेदनानिग्रहः ६ क्रिया ७ उपक्रमः ८ शमः ९। इति राजनिर्घण्टः॥ चिकित्सितम् १० प्रतीकारः ११ भिषग्जितम् १२। इति रत्नमाला॥ रोगप्रतिकारः १३। इति शब्दरत्नावली॥ सा त्रिधा यथा, वैद्यके।
"आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता।
रसप्रधाना दैवी स्यात् छेदभेदात्मिकासुरी॥
मानुषी षड्रसा ज्ञेया जपहोमादिसंस्कृता।
कलौ चाल्पबले लोके मानुषी तत्र पूजिता॥"
तस्या लक्षणं यथा,—
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम्॥
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्॥"
चिकित्साविध्युपदेशो यथा,—
"जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः।
वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ॥
रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्।
ततः कर्म्म भिषक् पश्चाज्ज्ञानपूर्व्वं समाचरेत्॥
औषधं केवलं कर्त्तुं यो जानाति न चौषधम्।
वैद्यकर्म्म स चेत् कुर्य्याद्वधमर्हति राजतः॥
आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः।
भेषजानां विधानेऽथ ततः कुर्य्यात् चिकित्सितम्॥
शीते शीतप्रतीकारमुष्णे चोष्णनिवारणम्।
कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता।
क्रियाहीनातिरिक्ता च साध्येष्वपि न सिध्यति॥
क्रिया यास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्।
पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो मतः॥"
चिकित्साफलं यथा,—
"क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्म्मः क्वचिद्यशः।
कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला॥"*॥
चिकित्साङ्गानि यथा, भावप्रकाशे।
"रोगी दूतो भिषग्दीर्घमायुर्द्रव्यञ्च सेवकः।
सदौषधं चिकित्सायामित्यङ्गानि बुधा जगुः॥"

चिकित्सितं, क्ली, (कित्+स्वार्थे सन् ततो भावे क्तः।) चिकित्सा। इति रत्नमाला॥ (यथा, सुश्रुते सूत्रस्थाने २ अः।
"बीजं चिकित्सितस्यैतत् समासेन प्रकीर्त्तितम्॥"
पर्य्याया अस्य यथा, वैद्यकरत्नमालायाम्।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
चिकित्स्यतेऽनेनेति। करणे क्तः। भेषजम्। अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम्॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत्।
यद्व्याधिनिर्घातकरं वक्ष्यते तच्चिकित्सितम्॥
चिकित्सितार्थं एतावान् विकाराणां यदौषधम्।"
यथा, भागवते। १। ५। ३२।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्।
यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम्॥")
कृतप्रतीकारे त्रि॥

चिकिनः, त्रि, (नि नता नासिकास्यस्य। "इनच्पिटच्-चिकचि च।" ५। २। ३३। इति इनच् प्रकृतेश्चिकादेशश्च।) चिपिटनासिकः। इति केचित्॥

चिकिलः, पुं, (चि+बाहुलकात् इलच् कुक् च।) पङ्कः। इति हेमचन्द्रः। ४। १५६॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति। "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३। १। ७। इति कृधातोः इच्छार्थकसन्प्रत्ययेन चिकीर्ष्। ततः "अप्रत्ययात्।" ३। ३। १०२। इत्यः।) कर्त्तुमिच्छा। इति मुग्धबोधम्॥ करिवार वाञ्छा इति भाषा। (यथा, भागवते।२।१०।२४।
"हस्तौ रुरुहतुस्तस्य नानाकर्म्मचिकीर्षया॥")

चिकीर्षुः, त्रि, (चिकीर्षतीति। कृ+सन्+"सनाशंसभिक्ष उः।" ३। २। १६८। इति उः।) कर्त्तुमिच्छुः। करणेच्छाविशिष्टः। इति व्याकरणम्॥

चिकुरः, पुं, (चि इत्यव्यक्तशब्दं कुरतीति। कुरशब्दे+"इगुपधज्ञेति।" ३। १। १३५। इति कः।) केशः। (यथा, राजतरङ्गिण्याम्।८।३६७।
"चिकुरनिचये यत् कौटिल्यं विलोचनयोश्च या॥")
सर्पः। (अयं हि ऐरावतकुलजातस्य सुमुखस्य पिता। यथा, महाभारते। ५। १०३। २४।
"एतस्य हि पिता नागश्चिकुरो नाम मातले!।
न चिरात् वैनतेयेन पञ्चत्वमुपपादितः॥")
पर्व्वतः। पक्षिभेदः। वृक्षविशेषः। गृहबभ्रुः। तरलः। इति मेदिनी। रे, १५५॥

चिकुरः, त्रि, (चि+कुर+कः।) चपलः। स तु दोषमनिश्चित्य वधबन्धनादेः कर्त्ता। इत्यमरः। ३। १। ४६॥

चिकुरपक्षः, पुं, (चिकुराणां केशानां पक्षः समूहः।) कचसमूहः। केशसमुदयः। इत्यमरः। २। ६। ९८॥

चिकुरपाशः, पुं, (चिकुराणां केशानां पाशः समूहः।) केशसमूहः। इत्यमरः। २। ६। ९८॥

चिकुरहस्तः, पुं, (चिकुराणां हस्तः समूहः।) केशसमूहः। इत्यमरः। २। ६। ९८॥

चिकूरः, पुं, (चिकुर+निपातनात् दीर्घः।) केशः। इति शब्दभेदप्रकाशः॥

चिक्क, क अर्त्तौ। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) कोपधः। तृतीयस्वरमध्यः। अर्त्तिः पीडनम्। क, चिक्कयति शत्रुं शूरः। इति दुर्गादासः॥

चिक्कः, पुं, (चिक् इत्यव्यक्तशब्देन कायति शब्दायते इति। चिक्+कै+कः।) छुच्छुन्दरिः। इति त्रिकाण्डशेषः॥ (नि नता नासिकास्येति। "इनच्पिटच्चिति।" ५। २। ३३। इत्यस्य वार्त्ति "कप्रत्ययचिकादेशौ च वक्तव्यौ।" इति कप्रत्ययो नेश्चिकादेशश्च। नतनासिके, त्रि। इति सिद्धान्तकौमुदी॥)

चिक्कणं, त्रि, (चिक्यते ज्ञायते इति। चित्+"चितेः कणः कश्च।" उणां। ४। १७६। इति कर्म्मणि कणः कश्चान्तादेशः। बाहुलकाद्गुणः।) स्निग्धश्लक्ष्णादि (स्निग्धत्वमसृणत्वादिगुणवद्वस्तु।) इत्यमरः। २। ९। ४६॥ चिकण इति भाषा॥ (यथा, महाभारते। १२। १८४। ३४।
"कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदुदारुणः॥")

चिक्कणः, पुं, (चिक्कणं स्निग्धगुणं विद्यतेऽस्य। अच्।) पूगवृक्षः। तत्फले क्ली। इति राजनिर्घण्टः॥ (औषधपाकस्यावस्थाविशेषो यथा,
"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः॥"
इति वाभटे कल्पस्थाने षष्ठेऽध्याये॥)

चिक्कणा, स्त्री, (चिक्कणं मसृणता विद्यतेऽस्याः। अर्शआदित्वादच्। ततष्टाप्।) उत्तमा गौः। तत्पर्य्यायः। नैचिकी २। इति शब्दचन्द्रिका॥ पूगफलम्। इति राजनिर्घण्टः॥

चिक्कणी, स्त्री, (चिक्कण+गौरादित्वात् ङीष्।) पूगफलम्। इति राजनिर्घण्टः॥

चिक्कसः, पुं, (चिक्कयति पीडयति चूर्णीकारित्वमिति। चिक्क+असच्।) यवचूर्णम्। इति हेमचन्द्रः। ३। ६६॥

चिक्का, स्त्री, (चिक्कयति पीडयति भोक्तारमिति। चिक्क+अच्।) पूगफलम्। इति राजनिर्घण्टः॥

चिङ्गटः, पुं, (चिङ्ग इत्यव्यक्तशब्देन अटतीति। अट गतौ+अच्। शकन्ध्वादिवत् अलोपः।) मत्स्यविशेषः। गलदाचिङ्गड़ी इति मोचाचिङ्गड़ी इति च भाषा॥ तत्पर्य्यायः। महाशल्कः २।